॥ अथअन्नप्राशनप्रयोगःप्रारंभः पत्रसंख्या॥ २॥

अप्र॥ श्रीगणेशायनमः॥ अथान्नप्राशनप्रयोगः॥ जन्मतः षष्ठेमासे असंभवे अष्टमाद्यन्यतमे समेमासे दंतेषु जातेषु
पूर्वाह्णे संवत्सरे वा शुक्लपक्षे अलाभे कृष्णपक्षे अन्त्यत्रिकरहिते कृष्णपक्षे वा नवमीपर्ववर्जितायुग्मतिथौ दशमी द्वितीयान्यत
मतिथौ वा चंद्रबुधगुरुशुक्राणामन्यतमे वासरे रोहिणी मृगशिरः पुनर्वसु पुष्योत्तराफल्गुनी हस्तचित्रा स्वात्यनुराधोत्त
राषाढा श्रवण धनिष्ठा शतभिषगुत्तराप्रोष्ठपदा रेवती अश्विन्यन्यतमे नक्षत्रे ज्योतिर्विदादिष्टे मुहूर्ते कार्यं॥ कुमार्या
स्तु समन्न संख्यया दशान्यतमो विषमो मासः षष्ठः संभवेन्नात्र॥ षष्ठेमासि क्रियायां तु गुरुशुक्रास्तमलमासादिनिषे
धो नास्ति॥ अन्नप्राशनचूडाकरणगोदानादिषु वैशेषिकहोमो नास्ति॥ अनुक्तत्वात्॥ नामकरणस्यापि वैशेषिकहोमः
॥ कश्चिदत्र क्रियत इति॥ तुसंन्तरामनराह॥ प्राप्त्यभावात्॥ जयादिनामुपहोमसंज्ञा कुर्वताश्वलसिद्धान्तान्नप्राशना ॥१॥
दिषु नास्ति॥ प्रधानहोम इति स्कंचितं॥ उपप्रधानस्य समीपे हूयंत इति उपहोमः॥ यत्र नास्ति प्रधानहोमः॥ तत्र व्या
हृत्यंतः सामान्यप्रधानहोमः॥ प्रधानहोमत्वेन विवक्षित इति॥ अत एव पुत्रोत्पत्त्यादिष्वाहुत्यंतेषु सामान्यप्रधा ॥ वांकुर॥

नहोम इति॥ शिष्टानां व्यवहारात्प्रश्न॥ कृतीकृत मांगलिकः प्राङ्मुख उपविश्य संवत्सर सहितां स्वभार्यां चोपविश्य दे
शकालौ संकीर्त्य ममास्य शिशोर्मातृगर्भमलप्राशनोनिबर्हणद्वारा अन्नाद्य ब्रह्मवर्चस तेजइंद्रियायुरभिवृद्धिद्वारा
श्रीपरमेश्वरप्रीत्यर्थं अन्नप्राशनाख्यं कर्म करिष्ये॥ तदंगं गणेशपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्रा
द्धं च करिष्ये॥ इति संकल्प्य कुर्यात्॥ ततउद्धननादिभूसंस्कारं विधाय नत औपासनाग्निं पितरि सक्ते वा ते लौकिकम
ग्निं वा शुचिनामानमग्निं प्रतिष्ठाप्य समित्त्रयमादाय अथ इह एहीत्यादिप्राणायामांतं कृत्वा॥ अन्नप्राशनहोमक
र्मणि या यक्ष्यमाणा देवतेत्यादि व्याहृत्यंतमुक्त्वा॥ नात्र प्रधानहोमः॥ अंगहोमादि संस्थाजपांतं कृत्वा स्विष्टकृदंतहो
मं पुण्याहवाचनांतं समाप्य ततः स्वदक्षिणे मातुरुत्संगस्थं प्राङ्मुखं शिशुं सुवर्णदर्व्या रौप्यदर्व्या वा मंगलघोषपूर्व
कं आस्यादितं दधिमधुघृतमिति त्रितयमिश्रितमन्नं कृत्वा प्राशयेदिमं मंत्रं प्राशयति॥ प्राशने सूत्रे मंत्राणां समुच्चय योगे तै
पद्भावात्॥ भूस्त्वयि दधामि॥ भुवस्त्वयि दधामि॥ स्वस्त्वयि दधामि॥ ततोऽन्नमेकवारं प्राशयति॥ अपां त्वौषधी

...रसंप्रादायामि शिवास्त आप ओषधयः स्वनमीवास्त आप ओषधयो भवंत्विति ॥ ततो यथेष्टं दापयित्वा ॥ सुखे
[illegible] ॥ बालकं भूमावुपवेश्य तदाग्रे पुस्तकं वस्त्रा शस्त्रादि शिलादि निविन्यस्य स्वेच्छया यद्धि शकं स्पृशेत् ॥ तस्य जी
विकेति परिक्षां कुर्यात् ॥ ततः कर्मांगत्वेन दशाधिकान्ब्राह्मणान्भोजयेत् ॥ भूयसीं दक्षिणां संकल्प्य दत्वाशिषो वा
चयित्वा कर्मसाद्गुण्याय विष्णुं स्मरेत् ॥ इदं च कुमार्या अप्य [illegible] मंत्रकं होमरहितं कार्यं ॥ इत्यन्नप्राशनप्रयोगः समा
प्तः ॥ श्रीहरिहरेश्वरार्पणमस्तु ॥ शके १८०४ चित्रभानुनामसंवत्सरे कार्तिक शुक्ल पौर्णिमायां मंदवासरे इदं पु
स्तकं लेले इत्युपनामकेन वामनभट्टस्य सूनुना काशीनाथेन लिखितं ॥ स्वार्थं परार्थं च ॥ श्रीकृष्णावेणीप्रसन्नोस्तु ॥

॥२॥

॥शंकर॥